# संस्कृतम्

## (309)

## शिक्षक-अंकितमूल्यांकनपत्रम्- I

## (पाठाः प्रथमतः द्वादशतपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् (50) शब्देषु लिखत–

(क) 'जीवनसन्देशः' पाठानुसारं वाङ्मनयोः शुद्धता, क्रोधसंयमः, भोजनस्य सम्मानः, महतां मानः, सन्तोष इति पचजीवनमूल्या आधत्य अन्यसंस्कृतग्रन्थेभ्यः/पत्रिकाभ्यः वा दश सूक्तीः (प्रत्येकम् अधिकृत्य द्वयम्) संकलयत।

(ख) संस्कृतसाहित्यात्/पत्रिकाभ्यः वा पाठातिरिक्तं काश्चित् पच प्रहेलिकाः संकलनीयाः। तासाम् अर्थसहितं वैशिष्ट्यमपि प्रदर्शनीयम्।

(ग) आरोग्येण कः लाभः? भवान् ब्राह्मे मुहूर्ते उत्थाय स्वास्थ्यलाभाय किं किं करोति? स्वानुभवात् तत्कृतं लाभं चापि लिखत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् (50) शब्देषु लिखत–

(क) 'वाचां मण्डनं सत्यम्' इति पाठानुसारं दानस्य वैशिष्ट्यं किम्? मानवैः जीवने किं किं प्राप्तव्यम् किं किं च त्याज्यम् इति लिखत।

(ख) 'अतिलोभः न कर्तव्यः' इति विषयम् आधत्य संस्कृतसाहित्ये पठितां कथां/स्वानुभूतां कामपि घटनां वा लिखत।

(ग) स्मारक–तीर्थयोः भेदं प्रदर्श्य सागरतटे नद्यास्तटे वा स्थितानां केवलं चर्तुणां तीर्थानां स्मारकाणां च परिचयः प्रदेयः।

3. कमप्येकं प्रश्नं दशवाक्येषु उत्तरत–

(क) 'एतद् उपास्यम्' इति पाठम् आधत्य भवते कानि पच विशिष्टानि जीवनमूल्यानि रोचन्ते यानि अन्येभ्यः अपि अद्यत्वे उपादेयानि सन्ति, लिखत।

(ख) 'परार्थे आत्मोत्सर्गः' इति कथायाः माध्यमेन कः सन्देशः प्रदत्तः? संस्कृतसाहित्ये/पत्रिकायां वा पठिताम् एतदभावयुक्तां कथाम् अथवा स्वानुभवात् कामपि घटनां वर्णयत।

4. कमप्येकं प्रश्नं दशवाक्येषु उत्तरत–

(क) 'काले फलति सौभाग्यम्' इति पाठानुसारं यदि भवान् लब्धदत्तस्य स्थाने भवेत् तर्हि किं कुर्यात्? इति लिखत।

(ख) 'परपीडकः इति कः कथ्यते?' 'पतन्ति परपीड़काः', इति पाठम् आधत्य दामोदरस्य बालचरितस्य वैशिष्ट्यं लिखत।

5. **परियोजनाकार्यम्**

(क) कमपि नाटकम् आधत्य तस्य कथां ससंवादं सचित्रं वर्णयत।

**अथवा**

(ख) पाठ्यपुस्तकात् कानिचित् पचविंशतिः 'क्त' कृदन्तपदानि चित्वा तेषां वाक्येषु प्रयोगं कुरुत।

# संस्कृतम्

## (309)

## शिक्षक-अंकितमूल्यांकनपत्रम्- II

## (पाठाः त्रयोदशतः विंशतिपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् (50) शब्देषु लिखत–

   (क) वर्षर्तुः कस्मात् मासात् प्रारभ्यते? वर्षर्तौ आकाशे पृथिव्यां च किं किं परिवर्तनं जायते? स्वानुभवात् लिखत।

   (ख) सूर्यस्य महत्त्वं वर्णयन् पारिवारिक–सद्भावना कथं विकसेत् इति 'अमतस्य पन्थाः' पाठम् आधृत्य लिखत।

   (ग) हिमालयस्य प्राकृतिकं वैशिष्ट्यं वर्णयन् भारतस्य मानचित्रे हिमालयक्षेत्रे स्थितानि तीर्थस्थानानि प्रदर्शयत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् (50) शब्देषु लिखत–

   (क) भ्रष्टकर्मचारिणः चाटुकारितया कथं शासकं वशीकुर्वन्ति इति वर्तमानसन्दर्भे (यथा स्पैक्ट्रम–२, विक्लीससूचना आदि) 'मानो हि महतां धनम्' इति पाठानुसारं समालोचयत।

   (ख) कल्पनायाः के साहसिकगुणाः नारीणां कृते आदर्शरूपाः? तस्याः किं चारित्रिकं वैशिष्ट्यम् अस्माकं कृते सदा प्रेरणाप्रदं भविष्यति?

   (ग) अनावष्टिः ओजोनपरत इत्यस्य क्षतिः, अनेके व्याधयः च पर्यावरणस्य प्रदूषणेन एव जायन्ते' इति मत्वा पर्यावरणसंरक्षणाय केचन पचोपायाः प्रदर्शनीयाः।

3. कमप्येकं प्रश्नं दशवाक्येषु उत्तरत–

   (क) क्रोधः कथं जायते? कथं च सर्वेभ्यः अनर्थकारकः भवति इति स्वानुभवात् किमपि उदाहरणं लिखत।

   (ख) 'अनन्तः ज्ञानसागरः' पाठम् अधिकृत्य कान्यपि पच वैज्ञानिकतथ्यानि आधुनिकविज्ञानसन्दर्भे वर्णयत।

4. कमप्येकं प्रश्नं दशवाक्येषु उत्तरत–

   (क) 'प्रियं मे भारतम्' अथवा 'विद्याविहीनः पशुः' इति विषयम् अधिकृत्य एकम् अनुच्छेदं लिखत, यस्मिन् एका सूक्तिः अवश्यं योजनीया।

   (ख) कमपि निर्धनं प्रति कृतोपकारविषये पिता–पुत्रयोः मध्ये जातं संवादं लिखत।

5. **परियोजनाकार्यम्**

   (क) 'अनन्तः ज्ञानसागरः' इति पाठानुसारं भारतीयवास्तुविद्यायाः गरिम्णः सूचकानि तथ्यानि सचित्रं सूचीबद्धानि कुरुत।

   **अथवा**

   (ख) एकादशपाठतः विशंतिपाठपर्यन्तं क्त्वा/ल्यप् प्रत्यययुक्तपदानां चयनं कृत्वा केवलं दशपदानां वाक्येषु प्रयोगं कुरुत।

# संस्कृतम्
## (309)
## शिक्षक-अंकितमूल्यांकनपत्रम्- III
## (पाठाः- एकविशंतितः पचविंशतिपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् (50) शब्देषु लिखत–

(क) सुश्रुतः कस्य पुत्रः आसीत्? किं नाम शल्यकर्म? सुश्रुतस्य अद्यतनख्यातिः केन कारणेन विद्यते? एकम् उदाहरणं लिखत।

(ख) संसारे वास्तविकं धनं किं मन्यते चारुदत्तः? तत्र कारणद्वयं लिखत। जीवने सर्वाधिकं मूल्यवत् किं मन्यते?

(ग) मैत्रबलः इति पदस्य कः अर्थः? मैत्रबले के के गुणाः आसन्? सस्कृतसाहित्ये कस्मिन् अन्यराजनि एते गुणाः सन्ति, स्वानुभवेन वर्णयत।

2. कस्यचिदेकस्य प्रश्नस्य उत्तरं पचाशत् (50) शब्देषु लिखत–

(क) भवता/भवत्या एका पत्रिका पठिता/एकं पुस्तकं वा पठितम्। तस्याः पत्रिकायाः/तस्य पुस्तकस्य वा समीक्षां लिखित्वा तस्याः प्रकाशनार्थं सम्पादकमहोदयं प्रति पत्रं लिखत।

(ख) भवतः/भवत्याः गहस्य समीपे निर्धनानां अनेकानि कुटीराणि सन्ति। स्वमित्रैः सह तत्र दीपावल्यादिपर्वसु सेवाकार्यार्थम् एकस्याः परियोजनायाः रूपरेखायाः निर्माणं कुरुत।

(ग) भवतां पाठ्यक्रमे पचविंशतिः पाठाः सन्ति। एतेषु कः पाठः भवद्भ्यः सर्वाधिकं रोचते किमर्थच इति दशवाक्येषु सोदाहरणं लिखत।

### वैकल्पिकपाठ्यक्रमः (विकल्पः क)
### संस्कृतं संस्कृतिश्च
### (पाठाः षड्विंशतितः एकोनत्रिंशत्पर्यन्तम्)

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु लिखत–

(क) प्राचीनमहाकाव्यानां विषयवस्तु प्रायः कैः ग्रन्थैः सम्बद्धं वर्तते स्म? इदानीन्तनकाव्यानां विषयवस्तु–अधिकृत्य तत्र किं परिवर्तनं दश्यते? तुलनां कृत्वा पचबिन्दून् लिखत।

(ख) वर्तमानकाले ओषधीनां संरक्षणार्थं कः प्रचारः के प्रयत्नाश्च क्रियन्ते? दूरदर्शने प्रसारितानां कासाचित् पचवनस्पतीनां चिकित्साविषयकं महत्त्वं लिखत। यथा निम्बः, वन्दा (तुलसी), घतकुमारी (ग्वारपाठा) इत्यादीनि।

**अथवा**

संस्कृतसाहित्ये पर्यावरणसंरक्षणम् अधिकृत्य दशसूक्तीनां सङ्कलनं कृत्वा तासामर्थं लिखत, यथाशक्ति चित्रणि अपि रचयत।

4. कचितेकं प्रश्नं दशवाक्येषु लिखत–

(क) बहवः संस्कृतशब्दाः हिन्दीभाषायाम् अन्यासु भाषासु च किचित् परिवर्तितरूपेण विद्यन्ते। एतादशाः दश शब्दाः विचित्य लिख्यन्ताम्–

| | | | |
|---|---|---|---|
| यथा– | संस्कृतम् | हिन्दी | अंग्रेजी |
| | भ्राता | भाई | Brother आदयः |

(ख) शिक्षया सम्बद्धाः कति संस्काराः सन्ति? वर्तमानकाले तेषु कस्य सर्वाधिकप्रासंगिकता अस्ति? आधुनिकसमये छात्राणां दीक्षान्त–समारोहेषु किं परिवर्तनम् अपेक्ष्यते।

**वैकल्पिकपाठ्यक्रमः (विकल्पः ख)**

**प्रयोजनमूलकसंस्कृतम्**

**(पाठाः षड्विंशतितः त्रिंशत्पर्यन्तम्)**

3. कचितेकं प्रश्नं दशवाक्येषु उत्तरत–

(क) द्वादशकक्षामुत्तीर्य भवन्तः केषु केषु क्षेत्रेषु कार्यं कर्तुं शक्नुवन्ति? तादशेषु क्षेत्रेषु कार्यकर्तणाम् नामानि लिखत। संस्कृतविषयकाः तेषाम् अनुभवाः लिख्यन्ताम्।

(ख) दूरदर्शनात् काश्चन प्रणाल्यः संस्कृतसाहित्यविषयकान् कार्यक्रमान् प्रसारयन्ति यथा आस्था, संस्कार, श्रद्धा इत्यादयः। प्रतिप्रणालिम् एकैकं कार्यक्रमं रुच्यनुसारं वर्णयत।

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु उत्तरत–

(क) कासाचन पच पत्रिकाणाम् सम्पादकमण्डलम्, प्रकाशनावधिम्, मूल्यम्, पजीकरणसंख्यां, प्रकाशनस्थानम्, पष्ठसंख्याम् अधिकृत्य विवरणस्य सङ्लनं कृत्वा लिखत।

(ख) स्वपाठ्यपुस्तकात् अनुच्चेदद्वयम् अधिकृत्य ततः सर्वाणि विरामचिह्नानि दूरीकृत्य लिखत। पुनश्च तत्र विरामचिह्नानां प्रयोगं कृत्वा लिखत।

5. **परियोजनाकार्यम्**

(क) पर्यावरणप्रदूषणमसम्बन्धीनि दश चित्राणि संकलथ्य तेषां वर्णनं संस्कृतभाषायां प्रतिचित्रं पचवाक्येषु कुरुत।

**अथवा**

(ख) भूमिः, आपः, आकाशः, वायुः, अनलः इति पचभूतानि यैः सष्टेः रचना भवति। एकैकं तत्त्वम् अधिकृत्य दश दश पर्यायवाचिनः शब्दाः लेखनीयाः।